दुग्धः, त्रि, (दुह + क्तः ।) प्रपूरितः । इति मेदिनी । धे, ८ ॥ क्षतदोहः । (यथा, हरिवंशे ।२।२५ ।
"तेनेयं गौर्म्महाराज ! दुग्धा शस्यानि भारत ! ॥"
दुह + भावे क्तः ।) दोहने, क्ली ॥

दुग्धकूपिका, स्त्री, (दुग्धकूपः साधनत्वेनास्त्यस्या इति । दुग्धकूप + ठन् । टाप् ।) पिष्टकविशेषः । यथा,—
"तण्डुलचूर्णविमिश्रितनवनीतेन सान्द्रपिष्टेन ।
दृढ़कूपिकां विदध्यात्ताञ्च पचेत् सर्पिषा सम्यक् ॥
अथ तां क्षीरितमध्यां घनपयसा पूर्णगर्भाञ्च ।
शङ्कमुद्रितवदनां तप्तघृतेन पक्ववदनाञ्च ।
अतिपाण्डुखण्डपाके स्नपयेत् कर्पूरवासिते
कुशलः ॥"
अस्या गुणाः ।
"अथ दुग्धकूपिका सा बल्या पित्तानिलापहा ।
वृष्या शीता गुर्व्वी शुक्रकरी तर्पणी रुच्या ।
विदधाति कायपुष्टिं हृष्टं दूरप्रसारिवीरम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे २ भागे ॥

दुग्धतालीयं, क्ली, (दुग्धस्य तालाय प्रतिष्ठायै हितम् । दुग्धताल + छः ।) दुग्धाग्रम् । क्षीरफेनः । इति मेदिनी । ये, ११३ ॥ दुग्धाग्रम् । इति हेमचन्द्रः ॥

दुग्धपाचनं, क्ली, (पच्यतेऽस्मिन्निति । पच + अधिकरणे ल्युट् । दुग्धस्य पाचनं पात्रम् ।) दुग्धपाकपात्रम् । तत्पर्य्यायः । वक्षकम् २ । इति हारावली । २२० ॥

दुग्धपाषाणः, पुं, (दुग्धं क्षीरं पाषाण इव कठिनं यस्य ।) द्रव्यविशेषः । शिरगोला इति भाषा । तत्पर्य्यायः । दुग्धपाषाणकः २ दुग्धाश्मा ३ क्षीरी ४ गोमेदसन्निभः ५ वस्त्राभः ६ दीप्तिकः ७ दुग्धी ८ क्षीरखवः ९ । अस्य गुणाः । रुच्यत्वम् । ईषदुष्णत्वम् । ज्वरपित्तहृद्रोगमूत्रकृच्छ्राश्मानविनाशित्वञ्च । इति राजनिर्घण्टः ॥

दुग्धपुच्छी, स्त्री, (दुग्धवत् शुभ्रं पुच्छं मञ्जर्य्यो यस्याः । गौरादित्वात् ङीष् ।) वृक्षविशेषः । दुग्धपेया इति ख्याता । तत्पर्य्यायः । शिवकालुः २ निद्रा ३ भद्रा ४ नवडुरी ५ । इति शब्दचन्द्रिका ॥

दुग्धफेनः, पुं, (दुग्धस्य फेन इव फेनो यत्र ।) क्षीरडिण्डीरः । तत्पर्य्यायः । शाकेरः २ । इति राजनिर्घण्टः ॥

दुग्धफेनी, स्त्री, (दुग्धवत् शुभ्रः फेनो यस्याः । गौरादित्वात् ङीष् ।) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । पयःफेनी २ फेनदुग्धा ३ पयस्विनी ४ लूतारिः ५ व्रणकेतुघ्नी ६ गोजापर्णी ७ । अस्या गुणाः । कटुत्वत् । तिक्तत्वम् । शिशिरत्वम् । विषव्रणनाशित्वम् । रुच्यत्वम् । शुक्ररसायनत्वञ्च । इति राजनिर्घण्टः ॥

दुग्धबीजा, स्त्री, (दुग्धवत् शुभ्रं बीजं यस्याः ।) यावनालाद्भवतातप्ततण्डुलचिपिटः । अस्या गुणाः । सुमधुरत्वम् । दुर्जरत्वम् । वीर्य्यपुष्टिदातृत्वञ्च । इति राजनिर्घण्टः ॥

दुग्धाक्षः, पुं, (दुग्धवत् शुभ्रं अक्षं नेत्रं चिह्नविशेषो यस्य ।) उपलविशेषः । इति शब्दार्थकल्पतरुः ॥

दुग्धाब्धितनया, स्त्री, (दुग्धाब्धेः क्षीरसमुद्रस्य तनया ।) लक्ष्मीः । इति कविकल्पलता ॥

दुग्धाश्मा, [न्] पुं, (दुग्धं क्षीरं अश्मा प्रस्तर इव कठिनं यस्य ।) दुग्धपाषाणः । इति राजनिर्घण्टः ॥

दुग्धिका, स्त्री, (दुग्धं निर्य्यासो बहुलतया विद्यते यस्याः । दुग्ध + ठन् । टाप् च ।) वृक्षविशेषः । दुधी इति दुध्याक्षीर इति च भाषा । तत्पर्य्यायः । स्वादुपर्णी २ क्षीराक्षी ३ क्षीरिणी ४ दुग्धी ५ क्षीरी ६ क्षीरात्मिका ७ । इति शब्दरत्नावली ॥ अस्या गुणाः । उष्णत्वम् । गुरुत्वम् । रूक्षत्वम् । वातलत्वम् । गर्भकारित्वम् । स्वादुक्षीरत्वम् । कटुत्वम् । तिक्तत्वम् । मलमूत्रोपसर्गकारित्वम् । पटुत्वम् । स्वादुत्वम् । विष्टम्भित्वम् । वृष्यत्वम् । कफकुष्ठकृमिनाशित्वञ्च । इति भावप्रकाशः ॥ वृक्षभेदः । गन्धिका इति ख्याता । तत्पर्य्यायः । उत्तमा २ युग्मफला ३ उत्तमफलिनी ४ । इति रत्नमाला ॥

दुग्धिणिका, स्त्री, रक्तापामार्गः । इति राजनिर्घण्टः ॥

दुग्धी, स्त्री, (दुग्धं क्षीरं बहुलतया अस्त्यस्या इति । अर्श आद्यच् । ततो गौरादित्वात् ङीष् ।) क्षीरावी । इति मेदिनी । धे, ८ ॥ (पर्य्यायोऽस्या यथा, वैद्यकरत्नमालायाम् ।
"उत्तमा दुग्धिका दुग्धी फलोत्तमा फलिन्यपि ॥")
दुग्धपाषाणः । इति राजनिर्घण्टः ॥

दुच्छकः, पुं, (दु उपतापे + भावे क्विप् तुक् च । दुत् उपतापः । तन्निराकरणे शक्नोतीति । शक + पचाद्यच् ।) सुरागामगन्धद्रव्यम् । पिशाचाद्यवकाशकः । इति मेदिनी । के, १०५ ॥

दुडिः, स्त्री, (दुलिः + लस्य डः ।) दुलिः । कच्छपी । इत्यमरटीकायां रायमुकुटः ॥

दुण्डुकः, त्रि, दुष्टचित्तः । इति शब्दार्थकल्पतरुः ॥

दुण्डुभः, पुं, (दोडति मज्जतीति । दुड मज्जने + "उभः कित् कुकिदृडिभ्यां कनुमौ रलोपश्च ।" १ । ४४० । इति उणादिकोषटीकाधृतसूत्रात् उभः नुम् रलोपश्च ।) डुण्डुभसर्पः । इत्युणादिकोषः ॥ (यथा, महाभारते ।६।१५४।१७० ।
"शरमीनां महारौद्रां प्रासशक्त्युग्रडुण्डुभाम् ।"
"शोणितौघवहां घोरां द्रोणिःप्रावर्त्तयन्नदीम् ॥")

दुद्रुमः, पुं, (दुर् दुष्टो द्रुमः । पृषोदरादित्वात् रलोपः ।) हरितपलाण्डुः । इत्यमरः ॥ २ । ४ । १४८ ॥

दुन्दमः, पुं, (दुन्द इत्यव्यक्तशब्देन मणति शब्दायते इति । मण शब्दे + डः ।) दुन्दुभिः । इति शब्दरत्नावली ॥

दुन्दुः, पुं, वसुदेवः । इति त्रिकाण्डशेषः । दुन्दुभिवाद्यम् । इति शब्दरत्नावली ॥

दुन्दुभिः, पुं, (दुन्दु इत्यव्यक्तशब्देन भातीति । भा + बाहुलकात् किः ।) ढक्का । तत्पर्य्यायः । भेरी २ आनकः ३ । इत्यमरः । १ । ७ । ६ ॥ (यथा, महाभारते । १ । १२३ । ४६ ।
"आकाशे दुन्दुभीनाञ्च बभूव तुमुलः स्वनः ॥")
वरुणः । दैत्यभेदः । इति मेदिनी । भे, १६ । (दानवविशेषः । यथा, हरिवंशे । ३ । ८१ ।
"अभवन् दनुपुत्राश्च शतं तीव्रपराक्रमाः ।"
"शङ्कुकर्णो विराधश्च गवेष्ठो दुन्दुभिस्तथा ॥")
रक्षोभेदः । वाद्यभेदः । इति शब्दरत्नावली ॥ विषम् । इति हेमचन्द्रः । २ । २०७ ॥ (कुक्कुरवंशीयस्य अन्धकस्य पुत्रः । यथा, भागवते । ९ । २४ । २० ।
"अन्धकाद्दुन्दुभिस्तस्मादविद्योतः पुनर्व्वसुः ॥"
क्रौञ्चद्वीपाधिपतेर्द्युतिमतः पुत्राणामन्यतमः । क्रौञ्चद्वीपस्य देशभेदश्च । यथा, मत्स्ये १६ अध्याये ।
"मुनिश्च दुन्दुभिश्चैव सुता द्युतिमतस्तु वै ।
तेषाञ्च नामभिर्देशाः क्रौञ्चद्वीपाश्रयाः स्मृताः ॥"
"मुनेस्तु मुनिदेशो वै दुन्दुभेर्दुन्दुभिः स्मृतः ॥"
पर्व्वतविशेषः । यथा, मत्स्यपुराणे ।१२१।१३।
"स एव दुन्दुभिर्नाम श्यामपर्व्वतसन्निभः ।
शब्दस्तस्य पुरा तस्मिन् दुन्दुभिस्ताडितः
सुरैः ॥"
असुरविशेषः । यथा, रामायणे । ४ । ९ । ४ ।
"मायावी नाम तेजस्वी पूर्व्वजो दुन्दुभेः सुतः ।
तेन तस्य महद्वैरं बालिनः स्त्रीकृतं पुरा ॥")

दुन्दुभिः, स्त्री, अक्षः । पाशकः । इत्यमरः । ३ । ३ । १३५ ॥ अक्षे पाशकविषये दानविशेषो विंत्ति इति ख्यातः । इति केचित् ॥ अक्षबिन्दुत्रिकद्वयम् । इति रभसः ॥ विन्दन्वितचतुष्पार्श्वसर्व्वाङ्गादिमयद्यूतोपकरणं पाशटी इति ख्याता । इति केचित् ॥ इति तट्टीकायां भरतः ॥

दुन्दुमारः, पुं, धुन्धुमारः । इति शब्दार्थकल्पतरुः ॥

दुरदृष्टं, क्ली, (दुर्दुष्टमदृष्टम् ।) दुर्भाग्यम् । इति स्मृतितत्त्वम् ॥

दुरध्वः, पुं, (दुर्दुष्टोऽध्वा । "उपसर्गादध्वनः ।" ५ । ४ । ८५ । इति अच् ।) कुपथः । इत्यमरः । २ । १ । १६ ॥

दुरभिग्रहः, पुं, (दुर्दुःखेन अभिमुख्येन गृह्यतेऽसौ इति । दुर् + अभि + ग्रह + खल् ।) अपामार्गः । इति राजनिर्घण्टः ॥ (दुरभि + ग्रह + कर्म्मणि खल् ।) दुःखग्राह्ये, त्रि ॥

दुरभिग्रहा, स्त्री, (दुरभिग्रह + टाप् ।) कपिकच्छुः । दुरालभा । इति राजनिर्घण्टः ॥

दुराकः, पुं, (दुनोतीति । दु न उपतापे + "आकः । सृजादेः स तु कित् ।" १ । ११६ । इति उणादिकोषटीकाधृतसूत्रात् आकप्रत्ययेन निपातनात् साधुः ।) म्लेच्छभेदः । इत्युणादिकोषः ॥

दुराचारः, पुं, (आचर्य्यते इति भावे घञ् । दुर्दुष्ट आचारः इति प्रादिसमासः ।) विरुद्धाचरणम् । यथा, अध्यात्मरामायणे ।
"प्राप्ते कलियुगे घोरे नराः पुण्यविवर्ज्जिताः ।
दुराचाररताः सर्व्वे सत्यवार्त्तापराङ्मुखाः ॥"